Geeta and Psychotherapy: When Arjun denied fighting war against his relatives in Kurukshera then Bhagwan Shree Krishna blessed him with the 'GeetaGyan' to fight with his mind set up. That is why Geeta is also thought of as a therapy (CBT) among Indian Psychologists (Sharma, २०१४)[14].

AddvaitVedant and Psychotherapy: A famous tale is: 'No Health without Mental Health' but I will add further 'No Mental Health without Spiritual Health'. Spiritual health comes in the life when an individual live his life in spiritual ways. Advaita theory is based on the spiritual dimension of wholeness and Oneness.

---

[12]Patanjali Yoga Sutras, १/ २

[13] Singh, R.H. (१९८६). Evaluation of some Indian traditional methods of promotion of mental health. Activitas Nervosa Superior, २८, ६७-६९.

[14] Sharma, N. (२०१४). Cognitive behaviour therapy in perspective of the bhagwatgita. International Journal of Humanities and Social Science Invention, ३ (१), २३१९ – ७७२२.

Swami Shivanand Ji and Psychotherapy: The literature of Swami Shivananda is full of psychological concepts of mind and Indian Psychology. He represented Indian Psychology before the world. Swami Shivanand (२००५)[15] in his book Manojay told that there are three types of feeling of self:

SaatvikAhankaar: To feel as I am Brahma.

RajsikAhankaar: To feel like I am a king, or intelligent.

TaamsikAhankaar: To feel I am fool or know nothing.

According to Indian Philosophy root cause of all troubles is ahankaar (feeling of self). And aim of all Gyan, Karma and Bhakti Yoga is to be free from ahankaar or feeling of self. Swami Shivanandji further told ahankar as twofold:

SthoolAhankaar: To feel oneself as a body.

SooksmaAhankaar: To have this feeling of Ahankaar about any theory or school.

---

[15]Shivanand, S. (२००५). Manojay. India (U. K.): Divya Jeevan Sangh.

ईशावास्योपनिषदि अव्यक्ततत्त्वविमर्शः

सुकान्तः[1]

ईशिता सर्वभूतानां सर्वभूतमयश्च यः।
ईशावास्येन सम्बोध्यमीश्वरं तं नमाम्यहम्॥

विश्वस्य प्रचीनतमसाहित्यं वेदोऽस्ति। वेदस्य अनेकासु शाखासु चतस्त्रः एव प्रचलिताः संहिताः। तासां च व्याख्यात्मकग्रन्थाः ब्राह्मणग्रन्थाः सन्ति। ब्राह्मणग्रन्थेषु भागद्वयं वर्त्तते। प्रथमस्तावच्छुद्धब्राह्मणः येषु वेदमन्त्राणां व्याख्यानं कर्मकाण्डानाञ्च प्रतिपादनम्। अपरश्चारण्यकः येषु दार्शनिकमाध्यात्मिकञ्च ज्ञानं लभते। अस्य ज्ञानस्य चरमोत्कर्षः आरण्यकेषु उपनिषद्खण्डत्वेन लभते। प्रत्येकं ब्राह्मणग्रन्थस्य अन्ते आरण्यकः परिशिष्टत्वेन युज्यते इति। प्रत्येकेषु च आरण्यकेषु उपनिषद् अन्त्या भवति। सिद्धान्ततः प्रत्येकम् उपनिषदः सम्बन्धः यया कयाचित् वैदिकशाखया सह सम्बद्धा खलु। अनेन प्रकारेण प्रत्येकं शाखायाः ब्राह्मणग्रन्थः आरण्यकग्रन्थः उपनिषच्च पृथक् एव अभविष्यन्।

वैदिकवाङ्मये उपनिषदां स्थानं सर्वान्ते परिगण्यते। अतो हेतो वेदान्त नाम्ना उपनिषद् अभिधीयते। वेदान्त एव उपनिषद् (ब्रह्मविद्या)।[2] अस्याः ब्रह्मविद्यायाः कारणेन जगति उपनिषदां प्रतिष्ठा अस्ति। प्रस्थानत्रयिषु अपि उपनिषद् प्रथमस्थानम्भजते। इहलोके परलोके वा परमशान्त्यै इयमुपनिषद् एव गरीयसी। ब्रह्मणः स्वरूपम्, आत्मनः लिङ्गम्, अमुत्ररहस्यम्, उपासनाविधिः, उपासनया च अभ्युदयः, निःश्रेयसःप्राप्तिः, सृष्टिरहस्यम्, ब्रह्मानन्दप्राप्त्युपायाः, आत्मनः परमात्मनश्च दर्शनोपायाः उपनिषदि एव लभते। परया अपरया च विद्यया सह कर्मवादः, ज्ञानस्य गरिमा, एकत्वस्य (अद्वैतस्य) च भावना, विश्वबन्धुत्वस्य भावना अमृतत्त्वनिरूपणं नानात्वं भावानायाश्च

[1] **शोधच्छात्रः, ज०ने०वि०वि० देहली**

[2] वेदान्तो नाम उपनिषद् प्रमाणम्। वेदान्तसार सदामुनिकृत

नाशः इत्यादिनिदर्शनं उपनिषत्सु लभते। ब्लूमफील्ड नाम्नः विदुषः शब्देषु "भारतीय चिन्तन का ऐसा कोई विषय नहीं है, जो इस उपनषद्विद्या से लाभान्वित न हुआ हो। निश्चय ही भारतीय चिन्तन की तुरीयावस्था उपनिषदों में निहित है।"

अव्यक्ततत्त्व-ज्ञान-सरण्यां भारतवर्षस्य वैशिष्ट्यम् अवर्त्तत। श्रूयते च सकलान्यऽपि भारतीयदर्शनानि दुःखस्याधारशीलायामेवाधितिष्ठन्ति। इह संसारे मनुष्यस्य स्वाभाविकी प्रवृत्तिर्वर्त्तते यत् सः खलु त्रिविधात्मकेभ्यः दुःखेभ्यः ग्रस्तः। यदीह एकैनेवोपायेन दुःखेभ्यः मुक्तिर्भवतु, तर्हि तत्किं सुखं दुःखं वाअपि धनार्जनम्, उताहो गृहदाहः, परीक्षायामुत्तीर्णता उतवा परीक्षायामनुत्तीर्णता। उत्तराणि तु सहर्षमाप्स्यन्ते। परन्तु एतानि सुखदुःखानि क्षणिकाण्यक्षणिकाण्येव उभयथा हि दृश्यन्ते। अत्र सुखमेव सुखमथवेह दुःखमेव दुःखमिति न कश्चिन्निश्चेतुं शक्नोति।

सर्वेषां दर्शनानां लक्ष्यमेकमेव यत् येन केन वा प्रकारेण मूलतत्त्वज्ञानम्भवतु। अनेन ज्ञानेन मोक्षविषयः उपतिष्ठते। तत्र समेऽपि दार्शनिकाः निजदर्शनस्य तत्त्वानां मूलप्रयोजनं मोक्षमेव मन्यन्ते। भारतीयदर्शनानां मूलतत्त्वविषयकं चिन्तनं विविक्तमत्र। सर्वादौ नास्तिकशिरोमणिः चार्वाकः जडपदार्थमेव संसारस्य मूलकारणं मन्यते। पृथिव्यादि चतुष्टयं (पृथिवी, अप, तेज, वायु) जडपदार्थत्वेन स्वीकरोति। एतेषां परमाणुविकारेण चैतन्यमुत्पद्यते। तदेव चैतन्यं अव्यक्तस्य व्यक्तम्। चार्वाकः स्वीयाव्यक्तं प्रमाणयितुं बृहदारण्यकोपनिषदं सम्मुखीकरोति। तस्योपनिषद्वाक्यस्यान्यार्थङ्गृह्णाति। किं कारणं श्रुतेः शरणम् चार्वाकाः? उक्तं हि तत्र-**A scoundrel quotes the Bible for the his own purpose.** अर्थात् स्वार्थसिद्धये दुष्टैरपि बाइबिलइत्यस्य उद्धरणानि दीयते। उत्तरे च बौद्धाः जैनाः नैयायिकाः वैशेषिकाः सर्वेऽपि परमाणुतत्त्वमेव नित्यं मूलतत्त्वञ्च स्वीकुर्वन्ति।

दक्षिणे च मीमांसकाः वैयाकरणाश्च परमाणूनप्यनित्यान् मन्यन्ते, शब्दतत्त्वमेव नित्यम्मूलञ्च मन्यन्ते। सांख्य-योगौ शब्दमप्यनित्यम्मन्येते। यतोहि शब्दस्त्वहंकारस्य कार्यम्, अहंकारस्तु महतः कार्यम्, महत्तु प्रकृतेः कार्यम्, अतः त्रिगुणात्मिकी प्रकृतिरेव मूलमिति। रामानुजाः सांख्यमेवानुसरन्ति। अद्वैतवेदान्तिनः प्रकृतिमपि मूलन्न मन्यन्ते। सर्वमेतत् ब्रह्मणः विवर्त्तमेवास्ति, येन प्रकृतिः सद्वस्तुरूपेण प्रतीयते। अतः नूनं हि ब्रह्म एव मूलङ्खलु। सर्वेषामन्यान्यानि तथ्यानि। सर्वेषु सांख्ययोगयोःअव्यक्तस्यैव पृथक् पृथक् स्वरूपं निरूपितमस्ति।

चार्वाकाः	जडपदार्थम्
बौद्धाः जैनाश्च	परमाणुतत्त्वम्
नैयायिकाः वैशेषिकाश्च	परमाणुतत्त्वम्
मीमासंकाः वैयाकरणाश्च	शब्दतत्त्वम्
रामानुजाः	प्रकृतितत्त्वम्
शांकराः	ब्रह्मतत्त्वम्
सांख्ययोगाः	प्रकृतितत्त्वम्

उपनिषत्परिचयः

सर्वादौ विषयापेक्षयोपनिषच्छब्दस्य निर्वचननेन विषयोऽयं प्रस्तूयते। उपनिषच्छब्दोऽसौ उप नि उपसर्गपूर्वाभ्यां षद्लृ विशरणगत्यवसादनेषु क्विपप्रत्यये कृते सति निष्पद्यते। अस्य शाब्दिकार्थः उप सामीप्ये नि निश्चयेन सीदति प्रप्नोति यया इति। "***सदेर्धातोर्विशरणगत्यवसादनार्थस्योपनिपूर्वकस्य क्विप्प्रत्ययान्तस्य रूपमुपनिषदिति***"।[3]

उपनिषद् शब्दस्य ब्रह्मविद्येत्यर्थः। उच्यते च यजुर्वेदस्य काठकसंहितायाः कठोपनिषदि शाङ्करभाष्ये।

"ब्रह्म गमयतीति ब्रह्मगमयतृत्वेन योगाद् ब्रह्मविद्योपनिषद्[4] ***। "उपनिषदोऽल्पाक्षरं ग्रन्थविवरणमारभ्यते। य इमां ब्रह्मविद्यामुपयन्त्यात्मभावेन श्रद्धाभक्तिपुरःसराः सन्तस्तेषां गर्भजन्मजरारोगाद्यनर्थपूगं निशातयति परं वा ब्रह्म गमयत्यविद्यादिसंसारकारणं चात्यन्तमवसादयति विनाशयतीत्युपनिषत्, उपनिपूर्वस्य सदेरवमर्थस्मरणात्।"***[5]

अक्षमालोपनिषदः हेरम्बोपनिषद् यावत् उपनिषदां संख्या तु द्विशतात्मिका उपलभ्यते। परन्तु विबुधाःएकादशोपनिषदः एव प्रामाणिक्यः मन्यन्ते।

ईश केन कठ प्रश्न मुण्डमाण्डूक्यतित्तिरिः।
ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं दश।[6] **श्वेताश्वतरेकादशः॥**

सम्प्रति तु एतासु दशस्वेवोपनिषत्सु आचार्यशंकरस्य भाष्यमुपलभ्यते। अत्रापि विबुधेषु मतैक्यता नावलोक्यते।

---

[3] कठोपनिषद् शांकरभाष्यम्।

[4] कठोपनिषद् शांकरभाष्यम्।

[5] मुण्डकोपनिषद् शांकरभाष्यम्।

[6] मुक्तिकोपनिषद् २/३०

अव्यक्ततत्त्वविमर्शः

अव्यक्तमिति किम् ? सांख्यदर्शने प्राथमिकतया द्वे स्वतन्त्रे तत्त्वे विवेचिते। प्रथमः जडा प्रकृतिः अपरश्चेतनः पुरुषः। विलक्षण-वैभूतिकी, ऐहिकैश्वर्यशालिनी, सृष्टेः सञ्चालिका नैजजडत्वेनाविद्यारुपधारिणी प्रकृतिः 'माया' इत्युपाधिमलङ्करोति।

"प्रकृतिरिति उच्यते विचारोत्पादकत्वात्, अविद्याज्ञानविरोधित्वात् 'माया' सृष्टिकारणत्वात्[7] ।" गुणानां साम्यावस्था प्रकृतिः।[8] "तत्र केवला प्रकृतिः प्रधानपदेन वेदनीया मूलप्रकृतिः। नासावन्यत्र कस्यचिद्विकृतिः। प्रकरोतीति प्रकृतिरिति व्युत्पत्त्या सत्त्वरजस्तमोगुणानां साम्यावस्थाया अभिधानात्।[9]

अपरा च कारणैर्वियुक्तैषा प्रकृतिः अजा; पुनरपि सृष्टेः जन्मदात्री अस्ति। अतः मूलप्रकृतिरुच्यते[10] । अखिलविश्वस्य कारणीभूतत्वेन आद्यमौलिकतत्त्वस्य हेतोः प्रकृतिरियं प्रधान इति कथ्यते। सर्वाणि कार्याणि पदार्थानि वा व्यक्तानि एव। अमीषां कार्याणाम्कारणमव्यक्तमेव। समस्तान्यपि वस्तूनि अस्यामेवाव्यक्तप्रकृतौ सन्निहितानि। तद्यथा-

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि॥[11]

ईशावास्योपनिषद्यव्यक्तचर्चा

विषयानुसारमीशावास्योपनिषदः भाष्येषु अव्यक्ततत्त्वस्य परिकल्पना। अत्र आचार्यशंकरस्य स्वामिदयानन्दस्य च व्याख्यानपरम्परामनुसरन् सांख्यस्य सृष्टेः प्रसविल्याः प्रकृतेः अव्यक्तस्य चर्चा लिख्यते।

अन्धन्तमः प्रविशन्ति येऽसम्भूतिमुपासते।
ततो भूय इव ते तमो य उ सम्भूत्यां रताः॥

आचार्यशंकरः निजभाष्ये असम्भूतिरित्यस्य पदस्य व्याख्यायां प्रकृतिरित्यर्थङ्करोति।

"सम्भवनं सम्भूतिः सा यस्य कार्यस्य सा सम्भूतिः, तस्या अन्या असम्भूतिः

---

[7]सांख्यप्रवचनभाष्यम् ।

[8]सांख्यप्रवचनभाष्यम्

[9]सर्वदर्शनसंग्रह पृष्ठसंख्या; ५२८

[10]सांख्यकारिका ३

[11]सांख्यकारिका १०

प्रकृतिः कारणमविद्या अव्याकृताख्या"[12] ।

अत्रोच्यते कारणमविद्या असम्भूतिः। अतः इहैव पठिते मन्त्रे "***अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते***" इत्यत्र अविद्यायाः आशयः आचार्यः प्रकृतिः अथवा कारणमिति न अपितु "***कर्मणो विरोधित्वात्; तामविद्यामग्निहोत्रादिलक्षणमेव***"[13] इति व्याख्यायते।

स्वामी दयानन्दः यर्जुर्वेदभाष्ये असम्भूतिमित्यस्य "***अनाद्यनुत्पन्नं प्रकृत्याख्यं सत्वरजस्तमोगुणमयं जडवस्तु***" [14] इत्यर्थङ्गृह्णाति। येन ईशावास्योपनिषदि अव्यक्ततत्त्वस्य परिकल्पना स्फुटीभवति। मन्त्रेऽस्मिन् आचार्ययोः शंकरदयानन्दयोः मतैक्यता दृग्गोचरीक्रियते। परन्तु अविद्या विषये दयानन्दः मतैक्यन्न प्रकटयति।

"***अनित्याशुचिदुःखानामात्मसु नित्यशुचिसुखात्मख्यातिरविद्येति ज्ञानादिगुणरहितं वस्तु कार्यकारणात्मकं जडं परमेश्वराद्भिन्नम्***"। इहापि ऋषिः अविद्यामव्यक्तत्वेन स्वीकरोति।

अमुमेवाव्यक्ततत्त्वङ्गीतायामपि श्रीकृष्णः अक्षर इति मन्यते। तत्राह-

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।

क्षरः सर्वाणि भूतानि कूटस्थोऽक्षरः उच्यते॥

"***क्षरो विनाशी एको राशिः अपरः पुरुषः अक्षरः तद्विपरीतो भगवतो मायाशक्तिः क्षराख्यस्य पुरुषस्य उत्पत्तिबीजम् अनेकसंसारिजन्तुकामकर्मादि-संस्काराश्रयः अक्षरः पुरुषः इति।***"[15]

मायेति पदेन वाच्यमव्यक्तं पदं सांख्यस्याव्यक्ततत्त्वचर्चायां निगदितमेव। अनेन ज्ञायते यत् अयं कूटस्थः अक्षरः अव्यक्तमेव। उक्तञ्च-

अव्यक्तोऽक्षर इत्याहुस्तमाहुः परमां गतिम्। यं प्राप्य न निवर्त्तन्ते तद्धाम परमं मम॥

अयं अक्षरः अव्यक्तः परमगतेः अधिष्ठानत्वं भजते। अत्र प्राप्य मनुष्यः न निवर्त्तते।[16] माण्डूक्योपनिषदि च अक्षरब्रह्मणः अव्यक्ततत्त्वस्य वर्णनमुपलभ्यते। अक्षरस्य प्रधानतत्त्वस्य सकलविश्वकारणत्वं प्राप्यते। लूतातन्तु-न्यायेन तथा

---

[12]ईशावास्योपनिषद् शांकरभाष्य मन्त्रसंख्या ११

[13]ईशावास्योपनिषद् शांकरभाष्य मन्त्रसंख्या ९

[14]यजुर्वेदभाष्यम् मन्त्रसंख्या ९

[15]शांकरभाष्यम् गीता श्लोक; १५/१६

[16]गीता ८/२१

युगपत्बदरप्रक्षेपण-रूपकेण च अत्राव्यक्ततत्त्वस्य कारणत्वं विशदयति।

यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति।

यथा सतः पुरुषात्केशलोमनि तथाक्षरात्सम्भवतीह विश्वम्॥[17]

गीतायाञ्च पराप्रकृतिः इति पदेन अव्यक्ततत्त्वस्य चर्चा श्रूयते। जीवभूता क्षेत्रज्ञलक्षणा प्राणधारणनिमित्तभूता पराप्रकृतिः शुद्धाप्रकृतिरिति कथ्यते।[18]

अपरेऽयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।

जीवभूतां महाबाहो ययेदं धार्यते जगत्॥

मुण्डकोपनिषदि शौनकांगिरर्ष्योः प्रश्नोत्तर-प्रसंगे द्वयोः विद्ययोः चर्चा श्रूयत एव। ***"द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च।"***[19] **तत्र च पराविद्याविषये मुण्डकोपनिषदि स्फुटं निगदितम्।**

*"**यदेतद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्।" नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः।**"*[20]

निष्कर्षः-

मूलतत्त्वज्ञानेन मोक्षस्य परिकल्पना भारतीयदर्शनानाम्मूलम्। श्रुतिः, स्मृतिः, ब्राह्मणोपनिषद् इत्यादयःअव्यक्तं हि (मूलम्) प्रतिपादयन्ति। उपर्युक्तेषु उद्धरणेषु सारोऽयं लभते यत् सांख्यस्य अव्यक्ततत्त्वम्, प्रधानतत्त्वम्, ईशावास्योपनिषदः व्याख्यासु लब्धमानः असम्भूतिः, स्वामिदयानन्दानुसारेण अविद्या इति व्याख्यानतो ज्ञायते। अपरे मुण्डकोपनिषदः पराविद्याक्षरश्चेति, श्रीमद्भगवद्गीतायाः अपराप्रकृतिः, मीमांसकानां वैयाकरणानाञ्च शब्दतत्त्वम्, अद्वैतवेदान्तीनां ब्रह्मतत्त्वम्। समेऽपि दार्शनिकविद्याकराः ग्रन्थाः तमेव वेदान्तमताव्यक्ततत्त्वं मुहुर्मुहुः श्रुतिस्मृत्यानुसारेण अव्यक्तमिति निर्दिशन्ति। यतोहि तज्ज्ञानेन विना मुक्तिरसम्भवा- ***नान्यः पन्था विद्यतेऽयनाय॥***[21]

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।

---

[17] मुण्डकोपनिषद् प्रथममुण्डक प्रथमखण्ड श्लोकसंख्या.७

[18] गीता ७/५

[19] मुण्डकोपनिषद् प्रथममुण्डक प्रथमखण्ड मन्त्रसंख्या.४

[20] मुण्डकोपनिषद् प्रथममुण्डक प्रथमखण्ड मन्त्रसंख्या ६

[21] यजुर्वेदसंहिता अध्याय २१ मन्त्र १८

मोक्षप्राप्ति में ज्ञान-कर्म की भूमिका

अवधेश कुमार[1]

कर्म कस्मात्? क्रियते इति सतः।[2]

यास्क के इस निर्वचन से कर्म का सामान्य अर्थ है - जो किया जाए। कर्म शब्द कार्य संपादन के अर्थ में सामान्यतः प्रयुक्त होता है। इसको स्वामी दयानन्द के शब्दों में इस प्रकार और अधिक स्पष्ट किया जा सकता है– "जो मन इंद्रिय और शरीर में, जीव चेष्टा विशेष करता है वह कर्म कहलाता है।[3] स्वामी जी ने कर्म की इस परिभाषा में कर्त्ता, साधन एवं कर्म तीनों को स्पष्ट किया है– कर्त्ता- जीवात्मा, साधन- मन, इंद्रिय तथा शरीर; कर्म- चेष्टा विशेष।

स्वामी जी ने कर्म को शुभ, अशुभ तथा मिश्र तीन प्रकार का माना है।[4] अथर्ववेद के अनुसार मनुष्य शुभ कर्मों से मोक्षसुख, अशुभ कर्मों से नरक रूप दुखों को तथा शुभाशुभ मिश्र कर्मों से मानव शरीर धारण करता है-

प्रथमेन प्रमारेण त्रेधा विष्वङ्विगच्छति।
अद एकेन गच्छत्यद एकेन गच्छतीहैकेन निषेवते॥[5]

फल की दृष्टि से हम कर्म का विभाजन दो प्रकार से पाते हैं- सकाम एवं निष्काम कर्म। "संसार के भोगों की इच्छा से इहलौकिक सुख की प्राप्ति के लिए जो धर्म युक्त कर्म किए जाते हैं वह सकाम कर्म हैं। मोक्ष अर्थात् दुखों से छूटकर केवल परमेश्वर की प्राप्ति के लिए किए जाने वाले धर्मयुक्त कर्म निष्काम कर्म हैं"।[6]

---

[1] **शोधच्छात्र, संस्कृत-विभाग, गुरुकुल-कांगड़ी-विश्वविद्यालय, हरिद्वार**

[2]निरुक्त३/१

[3]आर्योद्देश्यरत्नमाला पृष्ठ ४८

[4]वही पृष्ठ ४८

[5]अथर्ववेद ११/८/३३

[6]ऋग्वेदादिभाष्यभूमिका, वेदविषयविचार, पृष्ठ २८८

सकाम कर्म से मनुष्य को पुनः पुनः मृत्युलोक में आना ही होगा अतः जीवन के मुख्य उद्देश्य मोक्ष की प्राप्ति में निष्काम कर्म ही सहायक हैं। निष्काम कर्म को उपनिषद् किस रूप में प्रस्तुत करता है यही प्रस्तुत लेख का विषय है। श्वेताश्वतरोपनिषद् में सृष्टि का कारण ब्रह्म को कहा गया है-

देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रम्।[7]

उसी ब्रह्म के प्रभुत्व से कर्म का विवर्त्तहो रहा है। वह कर्म का संचालन करके फिर स्वयं उसमें से निवृत्त हो जाता है–

तेनेशितं कर्म विवर्त्तते......।[8]

तत्कर्म कृत्वा विनिवर्त्य भूयस्तत्त्वस्य तत्त्वेन समेत्य योगम्।

एकेन द्वाभ्यां त्रिभिरष्टभिर्वा कालेन चैवात्मगुणैश्च सूक्ष्मैः।[9]

निष्काम कर्म के स्वरूप को और अधिक स्पष्ट करते हुए श्वेताश्वतरोपनिषद्में आगे कहा है-

आरभ्य कर्माणि गुणान्वितानि भावांश्च सर्वान्विनियोजयेद्यः।

तेषामभावे कृतकर्मनाशःकर्मक्षये याति स तत्त्वतोऽन्यः॥[10]

त्रिगुणों से युक्त कर्मों को आरम्भ कर उनसे भावों को जो युक्त करता है उन भावों के अभाव में कृत कर्मों का नाश करने हारा वह ब्रह्म कर्मक्षय होने पर तत्वों से पृथक हो जाता है। डॉ सत्यव्रत सिद्धान्तालंकार के शब्दों में- भाव (मन की सकाम-भावना) का अभाव हो जाए, वह हट जाए तो कृत कर्म का नाश हो जाता है। भाव न रहे तो कर्म होने पर भी मानो कर्म नहीं होता।[11]

स्पष्ट ही है कि निष्काम कर्म का यही स्वरूप है। उक्त उपनिषत्-संदर्भ सेनिष्काम का साधारणतया यही अर्थ प्रतीत होता है कि **कर्म-संपादन में कामना अथवा भावों का अभाव हो जाए।** बृहदारण्यकोपनिषद् में कहा गया है-

---

[7]श्वेताश्वतरोपनिषद् ६/१

[8]श्वेताश्वतरोपनिषद् ६/२

[9]श्वेताश्वतरोपनिषद् ६/३

[10]श्वेताश्वतरोपनिषद् ६/४

[11]एकादशोपनिषद् पृष्ठ १०२८

पुण्यो वैपुण्येन कर्मणा भवति पापःपापेनेति.....[12]

अर्थात् सकाम भावना हो तो पुण्य कर्म से पुण्य फल प्राप्त होगा और पाप कर्म से पाप फल की प्राप्ति अनिवार्य है। इसी कर्म फल से भावी योनि की प्राप्ति होती है–

अथ खलु क्रतुमयःपुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतःप्रेत्य भवति स क्रतुं कुर्वीत॥[13]

पुरुष जैसा इस लोक में कर्म करता है वैसा ही यहां से चलकर वह आगे होता है। अतः कर्म अवश्य करे। परन्तु कर्म के मूल में कामना का अभाव होना आवश्यक है। उक्त प्रसंग में यह विचारणीय हो जाता है कि कर्म में कामना अथवा भावना का अभाव कैसे हो? इसको स्पष्ट करते हुए ईशावास्योपनिषद् में कहा गया है-

ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मागृधः कस्यस्विद्धनम्॥
कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥[14]

इस चराचर जगत में शास्त्र विहित कर्मों को ईश्वरपूजा के निमित्त करते हुए और परब्रह्म का स्मरण करते हुए ही सौ वर्ष तक जीने की इच्छा करनी चाहिए। शास्त्रोक्त कर्मों को करते हुए सौ वर्षों तक जीवन यापन करना केवल उस परमात्मा की पूजा के निमित्त ही है, अपने लिए कुछ नहीं ऐसी दृढ़-भावना बना लेने से वे कर्म, बंधन में नहीं बांध सकते और मनुष्य निष्काम-मार्ग का अनुगामी बन मोक्षोन्मुख हो सकता है। तात्पर्य यह है कि कर्म के पीछे की कामना का अभाव तभी संभव है जब कर्म को ईश्वर में समर्पित कर सम्पादित किया जाये।

परंतु इसी प्रसंग में यह बात विचारणीय है कि मात्र निष्काम कर्म ही मोक्ष को प्राप्त नहीं करा सकते हैं। उपनिषद् का मुख्य प्रतिपाद्य ब्रह्मविद्या है। मुण्डकोपनिषद्में ऋषि

---

[12]बृहदारण्यकोपनिषद् ३/२/१३

[13]छान्दोग्योपनिषद् ३/१४/१

[14]ईशावास्योपनिषद्१-२

"तदमृतं तद्वेद्धव्यं सोम्य विद्धि"[15] यह उपदेश करता है। जीवन का उद्देश्य उसी ब्रह्म को प्राप्त कर लेना है-

धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं सन्धयीत।
आयम्यतद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि ॥[16]

हे सोम्य! उपनिषद्रूप महान् अस्त्र रूपी धनुष को ग्रहण करके उपासना रूप तेज शरका सन्धानकरके उस अक्षर ब्रह्म रूप लक्ष्य में लगे चित्त से धनुष को खींचकर अक्षर रूप लक्ष्य को वेध डाल। अर्थात् वह अक्षर ब्रह्म ही एकमात्र लक्ष्य है। यद्यपि मोक्ष के स्वरूप का विचार करना प्रस्तुत लेख का विषय नहीं है तथापि सामान्य शब्दों में कहें तो ब्रह्म प्राप्ति ही मोक्ष है। ब्रह्म की प्राप्ति अथवा ब्रह्ममय कैसे हो इस विषय को मुण्डकोपनिषद् में कहा गया है-

न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा।
ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥[17]

अर्थात् वह ब्रह्म चक्षु से न वाणी से न इंद्रियों से न तप से और नही कर्म से प्राप्त किया जा सकता है। ज्ञान के प्रसाद से विशुद्ध अंतःकरण वाला व्यक्ति ध्यान करता हुआ उस निष्कल ब्रह्म को प्राप्त करता है। इसी विषय में प्रश्नोपनिषद् में भी ऐसा ही उल्लेख है-

परमेवाक्षरं प्रतिपद्यते स यो ह वैतदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य! स सर्वज्ञःसर्वो भवति।[18]

हे सोम्य! वह जो निश्चयपूर्वक उसतमोविहीन, शरीररहित, लोहितादि गुणों से शून्य, शुद्ध एवं अविनाशी पुरुष (आत्मा) को जानता है, वह उस परम अक्षरब्रह्म को ही प्राप्त होता है। वह सर्वज्ञ और सर्वरूप हो जाता है। इस प्रकार मनुष्य को अभीष्ट है कि यह जो कर्म कीनैरन्तर्यपरंपरा दीर्घकाल से सतत है इसका बाध कर लेना चाहिए और इस हेतु उपनिषद् का उपदेश है कि कर्म को ब्रह्म में अर्पित कर उस कर्म के प्रति नितान्त उदासीनता को धारण करना चाहिए। साथ ही ज्ञान के प्रसाद से अपना अन्तःकरण विशुद्ध करना भी मुख्य है।

---

[15]मुण्डकोपनिषद्२/२

[16]मुण्डकोपनिषद् २/३

[17]मुण्डकोपनिषद् ३/१/८

[18]प्रश्नोपनिषद् ४/१०

चारों वेदों के प्रमुख उपनिषद् ग्रन्थ

डॉ० स्नेहलता

चारों वेदों की उपनिषदें आत्मज्ञान का महा सागर हैं।

इन उपनिषदों से ही होते जीवन के तथ्य उजागर हैं।

ऐतरेय और कौषीतकि उपनिषदें हैं ऋग्वेद की।[1]

ऐतरेय में विद्या है सृष्टि के रहस्यमय भेद की।[2]

कृष्ण और शुक्ल दो प्रकार की शाखाएं हैं यजुर्वेद की।

कठ तैत्तिरीय आदि उपनिषदें हैं कृष्ण यजुर्वेद की।[3]

कठोपनिद् में यम और नचिकेता की कथा का वर्णन है।[4]

तैत्तिरीय में भू: भुवः स्वः मह: चार व्याहृतियों का वर्णन है।[5]

---

[1] वैदिक साहित्य का इतिहास- आचार्य बलदेव उपाध्याय

[2] स इमाल्लोकान् सृजत। अम्मो मरीचीमरमापः। अदोऽम्मः परेण दिवं द्यौ प्रतिष्ठा; अन्तरिक्षं मरीचयः पृथिवीमरो; या अधस्तात आपः ॥२ ॥ ऐतरेयोपनिषद- प्रथम अध्याय; प्रथम खण्ड

[3] वैदिक साहित्य का इतिहास- आचार्य बलदेव उपाध्याय

[4] कथा का आस्य- अध्याय १. वल्ली १ से लेकर वल्ली ६ तक
उशन् ह वै वाजस्रवसः सर्ववेदसं ददौ। तस्य ह वै नचिकेता नाम पुत्र आस। कठोपनिषद्- अध्याय १, वल्ली १ सह नाववतु, सह नौ भुनक्तु सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु, मा विद्विषावहै। कठोपनिषद् अन्तिम छठी वल्ली

[5] (क) भूरिति वा अयं लोकः। भुवः इत्यन्तरिक्षम्। सुवरित्यसौ लोकः मह इत्यादित्यः। आदित्येन वाव सर्वे लोका महीयन्ते ॥१ ॥
(ख) भूरिति वा अग्निः। भुवः इति वायुः। सुवरित्यादित्यः। मह इति चन्द्रमाः। चन्द्रमसा वाव सर्वाणि ज्योतींषि महीयन्ते ॥२ ॥

तैत्तिरीय के दशवें भाग की उपनिद् महानारायण है।[6]

श्वेताश्वतर में ब्रह्मचक्र और योगाग्नि का वर्णन है।[7]

शुक्ल यजुर्वेद की बृहदारण्यक और ईशोपनिषद् हैं।[8]

बृहदारण्यक में जनक और याज्ञवल्क्य के संवाद हैं।[9]

इसमें राजा अजातशत्रु और गार्ग्य की गूढ वार्तायें हैं।[10]
गार्गी मैत्रेयी के वार्तालाप और अनेक अवान्तर कथाएं हैं।[11]

(ग) भूरिति वा ऋचः। भुवः इति सामानि। सुवरिति यजूषि। मह इति ब्रह्म। ब्रह्मणा वाव सर्वे वेदा । महीयन्ते।३ ॥

(घ) भूरिति वै प्राणः। भुवः इत्यपानः। स्वरिति व्यानः। मह इत्यन्नम्। अन्नेन वाव सर्वे प्राणा महीयन्ते ॥४ ॥ तैत्तिरीयोपनिषद्- पंचम अनुवाक

[6] तैत्तिरीयोपनिषद् के आरम्भ में लिखा है कि इसका दसवाँ प्रपाठक महानारायण उपनिषद् है।

[7] (क) पृथिव्यप्तेजोऽनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते। न तस्य रोगो, न जरा, न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम् ॥१२ ॥ श्वेताश्वतरोपनिषद् - अध्याय २

(ख) सर्वा जीवे सर्वसस्थे बृहन्ते, अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे।
पृथगात्मानं प्रेरितारं च मत्वा, जुष्टस्ततस्तेनामृतत्त्वमेति ॥६ ॥ श्वेताश्वतरोपनिषद् १

[8] वैदिक साहित्य का इतिहास - आचार्य बलदेव उपाध्याय।

[9] जनको ह वैदेहो आसाञ्चक्रेऽथ ह याज्ञवल्क्य आ वव्राज। तं होवाच याज्ञवल्क्य! किमर्थमचारी! पशूनिच्छंन्नण्वन्तानिति। उभयमेव सम्राडिति होवाच ॥१ ॥ बृहदारण्यकोपनिषद्, चौदह अध्याय, प्रथम ब्राह्मण

यह ऐतिहासिक वार्ता है- एक बार विदेहराज जनक जब अपने सभाभवन में बैठे हुए थे, उस समय वहाँ याज्ञवल्क्य आ गये। राजा जनक ने उनसे कहा- हे याज्ञवल्क्य! किस प्रयोजन के लिए तुम यहाँ आये हो? क्या पशुओं को चाहते हुए अथवा सूक्ष्म सिद्धान्तों को जानना चाहते हुए यहाँ आये हो? याज्ञवल्क्य ने कहा- महाराज! दोनों को ही चाहता हुआ मैं यहाँ आया हूँ। इसके बाद जनक और याज्ञवल्क्य में अनेक वार्तालाप हुये।

[10] दृप्त बालाकिर्हनूचायो गार्ग्य आस। स होवाच ज्ञातशत्रु काश्यं ब्रह्म ते ब्रवाणीति। बृहदारण्यक उपनिषद् अध्याय १ बाह्मण १

दूसरा ईशोपनिषद् तो यजुर्वेद का ही ४०वां अध्याय है।
जो ज्ञान, कर्म, त्याग और ईश्वर भक्ति का पर्याय है।[12]
सामवेद की छान्दोग्य, जैमिनि और केनोपनिषद् हैं।
छान्दोग्य में प्रणव उपासना के उद्गीथमय स्वर हैं।[13]
सत्यकाम, जाबाल, उपकौसल और रेकों के प्रसंग हैं।[14]
वेदत्रयी का सार और ब्रह्म की महत्ता आदि इसके अंग हैं।[15]
केनोपनिषद् में हैं ब्रह्म की अद्भुत शक्ति का विवरण।
नष्ट हो गया था जिसके द्वारा देवों के अहंकार का आवरण।[16]

---

[11] (क) गार्गी याज्ञवल्क्य वार्तालाप - बृहदारण्यक उपनिषद् -३/८
(ख) मैत्रेयी याज्ञवल्क्य वार्तालाप- बृहदारण्यक उपनिषद् -२/४

[12] ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्॥ तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥१॥ ईशावास्योपनिषद्-१

[13] (क) अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इति। छान्दोग्योपनिषद् प्रपाठक १ खण्ड ५
(ख) ओमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति तस्योपव्याख्यानम्।
छान्दोग्योपनिषद्- प्रपाठक १ खण्ड १

[14] (क) सत्यकामो ह जाबालो मातरममन्त्यां चक्रे।
ब्रह्मचर्यं भवति विवत्स्यामि। कि गोत्रोन्वहयस्मीति॥१॥ छान्दोग्योपनिषद्-प्रपाठक ४ खण्ड ४।
(ख) उपकौसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुपास। तस्य ह द्वादशवर्षाण्यग्नीन्। १/१०। छान्दोग्योपनिषत्, प्रपाठक ४, खण्ड १०
(ग) छान्दोग्योपनिषत्- प्रपाठक ४ खण्ड २

[15] (क) ऋचो यजूंषि सामनित्यष्टावक्षराणि। अष्टाक्षरं ह वा एक गायत्र्यै पदम्। एतदु हैवास्या एतत्। स। यावतीयं त्रयी विद्यां तावद्ध जयीत योऽस्या एतदेव पदं वेद॥२॥
(गायत्री मन्त्र के प्रथम आठ अक्षर वेदत्रयी का सार है।) बृहदारण्यकोपनिषद् ब्राह्मण५ अध्याय ११
(ख) प्राणो ब्रह्म। खं ब्रह्मेति। छान्दोग्योपनिषत्-प्रपाठक ४ खण्ड १०

अथर्ववेद की प्रश्न, माण्डूक्य और मुण्डक उपनिषदें हैं।
प्रश्नोपनिषद् में शिष्य गुरु पिप्लाद से प्रश्न पूछते हैं।[17]
माण्डूक्य ऋषि प्रणेता हैं माण्डूक्य उपनिषद के।
वर्णन है इसमें ओ३म् अक्षर के अकार, उकार, मकार के।[18]
अथर्ववेद की अन्तिम और तीसरी उपनिषद् मुण्डक है।
पाप ताप को मुंडने वाली होने से इसका नाम मुण्डक है।
अंगिरा ऋषि और शौनक के वार्तालाप का विवरण है इसमें।[19]
उस परपुरुष पर ब्रह्म के स्वरूप का वर्णन है इसमें।[20]
चन्द्र सूरज तारकावलियों को जो करता प्रकाशमान है।
ज्योतियों का अतीत है वह ब्रह्म और सर्वशक्तिमान् है।[21]

---

[16] ब्रह्म ने सृष्टि के रचनाकर अग्नि पवन आदि देवगणों में भी शक्ति की स्थापना की। देवों ने सोचा कि यह सृष्टिरचना का महान् कार्य हम देवों के द्वारा ही हुआ है; इसलिए वे अहंकारी हो गये। ब्रह्म ने यक्ष का रूप धारण कर देवगणों की एक तिनके के द्वारा परीक्षा लेकर उनका अभिमान नष्ट किया। केनोपनिषत् खण्ड ३/१-३/१२

[17] प्रथम प्रश्न से लेकर छठे प्रश्न तक- प्रश्नोपनिषत्। एक समय भरद्वाज का पुत्र सुकेश, शिवि का पुत्र सत्यकाम, गर्गगोत्री सोर्यायणी, अश्वल का पुत्र कौसल्य, भृगु का पुत्र वैदर्भ, कत का पोता कबन्धी, ये ईश्वरभक्त शिष्य बनकर परब्रह्म को खोजते हुए हाथों में समिधाएं लेकर अपने प्रश्नों के समाधान के लिए पिप्पलाद ऋषि के पास गए।

[18] ओमित्येतदक्षरमिदं सर्वं तस्योपाख्यानं भूतभवत्भविष्यादीनि सर्वमोंकार एव यच्चान्यत् त्रिकालातीतं तदप्योंकार एव ॥१ ॥ अथ माण्डूक्योपनिषत् ॥

[19] अथर्ववेदीय इस मुण्डक उपनिषद् में प्रथम मुण्डक से द्वितीय मुण्डक तक ऋषि अंगिरा और शौनक के वार्तालाप हैं।

[20] ब्रह्म देवानां प्रथमः सम्बभूव, विश्वस्य कर्ता भुवनस्य गोप्ता। मुण्डकोपनिषद्-प्रथम मुण्डक प्रथम खण्ड।

पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम्।
एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थि विकिरतीह सोम्यः ॥१० ॥ मुण्डोकोपनिषद् - मुण्डक-२, खण्ड-१

जानकर उस ब्रह्म को और कुछ भी जानना ना शेष है।

मृत्यु का पथ पार करने के लिए अन्य कोई मार्ग ना अवशेष है।[22]

अतः १०८ उपनिषदों में वेद की मुख्य उपनिषदें तो यही हैं।

सब में आत्मतत्त्व और ब्रह्म शब्द की व्याख्याएं ही हैं।

---

[21] न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।

तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥१०॥ मुण्डोकोपनिषद् -मुण्डक-२, खण्ड-२

[22] वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।

तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्थाः विद्यतेऽनयाय॥८॥ श्वेताश्वतरोपनिषत्-अध्याय ३

परिकल्पानायाः ब्रह्मॉसपर्यन्तम्

डॉ० ए० शिवताणुपिल्लैः

(डॉ आपत्तुकान्तशिवताणुपिल्लेवर्याः क्रूजप्रक्षेपास्त्रब्रह्मॉसस्य वास्तुकाराः। एते अस्याः परियोजनायाः कार्यकार्यधिकारिणः प्रबन्धनिदेशकाश्चाभवन् येषां भारतीयान्तरिक्षानुसन्धानसंघटने रक्षानुसन्धानविकाससङ्घटने च भारतस्य प्रक्षेपास्त्रकार्यक्रमाणां चत्वारिंशद्वर्षाधिको महान् अनुभवो वर्तते।

भारतसर्वकारेण पद्मश्रीपद्मभूषणालङ्करणाभ्यां रूसदेशस्य सर्वकारेण च आर्डर ऑफ केरिट इत्यलङ्करणेन सम्मानिताः। प्रस्तुतोऽयं लेखः तैर्लिखितपुस्तकस्य आर्यभाषानुवादस्य "ब्रह्मॉस प्रक्षेपास्त्र की सफलता अज्ञात राहों का अभियान" इत्यस्य भूमिकाभागो वर्तते। लेखोऽयं वैज्ञानिकस्य विज्ञानदृशा सह प्रकृतौ रममाणान् भावान् अपि प्रकटयति।)

अरबसागरसंस्थितादेकस्मात् युद्धपोतात् ब्रह्मॉसप्रक्षेप्यस्य चामत्कारिकस्य सफलोड्डयनस्य पश्चात् एकस्मिन् दिवसेऽहं सुदीर्घां जलयात्रां परिसमाप्य पश्चिमतटं प्रति गोवां निकषा आगच्छन्नासम्। सुसफलस्यास्य प्रक्षेपणस्यानन्तरं जलयाने उत्सव इवावर्तत। अस्माकं व्यवस्थातन्त्रं कियदुत्कृष्टम्? पूर्णतः त्रुटिहीनं निश्चितं तीव्रतमञ्च अस्ति।

यः कक्षः यात्रायामस्यां मदुपयोगार्थं मह्यं प्रदत्त आसीत् तमहं नायककक्षं प्रतिनिवृत्तः। तत्रोपविश्याहं सफलं प्रक्षेप्यास्त्रस्य प्रदर्शनं भाविकार्यक्रमांश्चान्यानधिकृत्य संक्षिप्तं किमपि विवरणादिकं कर्गदे अङ्कयितुमारेभे। अभिनवान् कांश्चित् स्वप्नान् द्रष्टुमहमभिनवमेव वायुमपेक्षे इत्यकस्मान्मे प्रतिभासोऽभूत् कश्चित्। अतोऽहं जलयानस्य मूर्ध्नि वर्तमानस्य पोताधिकारिणे निर्धारितस्य आसनस्योपरि नौसैन्यदलनायकस्य तमुच्चासनमध्यतिष्ठं यस्योपरि श्वेतवस्त्रमासीत्। तस्मिन् पोतासने (पोताधिकारिणः चत्वरे) अहमात्मना द्वितीय आसम्। तस्यां नीरवतायामहं प्रकृतेः शोभा निभालयितुं

व्यस्तोऽभवम्। सांयकालीनो मन्दशीतलसमीरणः तत्समुद्रोद्भवः मामालिङ्गन्नवर्तत। अस्ताचलं प्रतिष्ठतो मरीचिमालिनो मरीचिणां विकीरितां वक्राविभा तिरश्चिना सती समुद्रतलमभिव्याप्य प्रासरत्। सूर्यो यथायथं नीचैः गन्तुं प्रावर्तत तदीयकिरणाः नारङ्गवर्णकाः तथैव मेघान् भित्वा तत्पारमियासवोऽभवन्। अतिनीलः कृष्णः एव वा प्रायः तत्कालीनो जलनिधिर्निजतरङ्गैस्सङ्गीतमयलयेन केनचित् अस्मज्जलयानस्य अधस्तलमनारतं प्रहरन्नासीत्। प्रहारैरेतैरुदबिन्दव उद्गच्छन्तो जलयानस्योपरि आपतन्तोऽभवन्। मत्स्यामनेके यूथाः उत्प्लुत्योपरि आगामङ्गामं पुनरन्तः समुद्रं न्यलीयन्त। सन्ध्याऽपि शनैश्शनैः रात्रितया परिणमन्ती आसीत्। अहमाकाशं प्रत्युन्नमितलोचनोऽभवम्। चन्द्रमाऽपि उज्जिगमिषति स्म चन्द्रिका चैतदीया दुग्धधवला निजदीप्तिं परितः प्रसारयन्ती आसीत्। तारकाण्यपि तदा द्योतनपरतां प्राप्नुवन्ति स्म। अहमन्यदेवेक जगत् प्रापम्। अरबोदधेरुरसि कीदृशमदो मनोहरद् दृश्यमासीत्।

सहसा मे मनः तस्मात् सौन्दर्यरसपानात् विरराम। निखिलाः अपि ताः विगताः घटनाः चलचित्रमिव मम मानसपटलमुद्बुद्धाः बभूवुः यासां परिणामतया प्रक्षेप्यास्त्रपरियोजनायामस्यां वयमभूतपूर्वमेव किमपि साफल्यमधिगन्तुं शेकुः। परीक्षणस्यायं निखिलः कार्यक्रमः नौसैन्यबलनिरस्तमेकं जलयानं लक्ष्यीकृत्य विहीतेनामोघेन प्रक्षेप्यास्त्रस्य प्रहारेण तथैव प्रारभ्यत यथा धनुर्विद्यायां शरव्यं किमपि सुष्ठ भिद्यते। प्रक्षेप्यास्त्रमेतद्धि नैकेषु निजप्रक्षेपणमार्गेषु अतितीव्र विसर्पद् केवलतया निजतीव्रगत्या अवशिष्टेन्धनशक्त्या च निर्धारितानि स्वलक्ष्यानि भस्मीकर्तुं सफलीबभूव। परियोजनायाः सर्वान् मानदण्डान् परिपालयतः लक्ष्याणि स्वीयानि नाशयतश्चास्य प्रक्षेप्यास्त्रस्य परीक्षणपरिणामाः सर्वात्मना तादृशा एवासन् यथा कस्मिंश्चित् पुस्तके पूर्णपरिशुद्धास्ते वर्णिताः दृश्यन्ते। भारतीयाः नौसेनायाः कृते आसीदपूर्वेयं काचित् सफलता अपूर्व एवानुभवश्च कोऽपि। भारतरूसदेशयोर्वैज्ञानिकानां समवेतप्रयत्नैः प्रक्षेप्यास्त्रमिदं द्रढिष्ठं तादृशमाकारं प्राप्तुमपारयत् यो हि वरुधीनीनां विविधाः अपेक्षाः पूरयितुमलमासीत्। प्रक्षेप्यास्त्रस्य परीक्षणात्मकं प्रक्षेपणमिदं निखिलविश्वस्य प्रक्षेप्यास्त्रविदो वैज्ञानिकान् विश्वसनीयतासहितेन अत्युत्कृष्टेन स्वप्रदर्शनेन चकितचकितान् अथ च अवाचः अकरोत्। निखिलेऽपि जगति कृतविकासानां प्रक्षेप्यास्त्राणामितरेषामपेक्षतया अस्त्रस्यास्य अतिगुणिनी प्रदर्शनक्षमतैषा अतुलनीय

श्रेष्ठैव च सिद्धाभवत् भावुकतायामाकण्ठमग्नश्चायं जनोऽभूत्। ब्रह्मॉसप्रक्षेप्यास्त्रेणानेन पुनरपि जगतितलेऽस्मिन् निजश्रेष्ठताध्वजः उत्तोलितः आसीत्।

प्रत्येकं सफलप्रक्षेपणानन्तरमुच्छलत्तरङ्गाः प्रसादपयोधेः मां परिवृत्यावर्तन्त इति भूयोभूयोऽनुभूयमान एवासीत्। सायंत्रिकदलेन तत्रत्येन आयोज्यमानः हर्षोत्सवः गुञ्जायते स्म। अहं परियोजनायास्तानारम्भिकदिवसान् पुनः स्मरन् चिन्तयंश्चासं तानि कारणानि यैः योजनेयं फलवती जाता। आरम्भिकास्त एव दिवसाः साहसपूर्णस्यास्य अनुष्ठानस्य महत्त्वपूर्णकालरूपेणैवावर्तन्त। यतस्तदैवास्याः शक्तिशालिन्याः परियोजनायाः आधारभूः स्थाप्यमाना परिपोष्यमाणा चासीत्। याः अस्मिन्कर्मण्यस्माभिः अनवरतं साधनानिरतैः समर्पिताः अगणिताभिस्ताभिः होराभिः एव संयुक्तेयं कार्यपरियोजना अभिनवमेव कमप्यायामवाप्तवती।

१९९५ तमे ख्रीस्ताब्दे यदायं संयुक्तपरियोजनाविषयको विचारः निश्चितं कमप्याकारमवापत् तदाहं तन्निर्देशकत्वेन आसम्। तदैव डॉ. कलामः (राष्ट्रपतिचरः प्रक्षेप्यास्त्रवैज्ञानिकश्च सुख्यातः) परामृशत् यत् भारतशासनसम्मत्याऽहं संयुक्तायाः अस्याः परियोजनायाः मुख्यकार्यकरणाधिकारित्वेन प्रबन्धनिदेशकत्वेन च नियोज्यै। यतोऽहं भारते क्रूजप्रकारकाणि प्रक्षेप्यास्त्राणि प्रबलं समर्थयन्नासं तथा च तदर्थमेव समर्पितां संयुक्तपरियोजनाञ्चेमां संघटयितुमारम्भादेव सततं कार्यनिरतः आसम् अतः स्वाभाविकरूपेणैवाहं कर्मणेऽस्मै चितः।

रसियादेशेन सह काऽपि संयुक्तपरियोजना सफला भवितुं नैवार्हिष्यति इत्यतो नेदृशं किमप्युत्तरदायित्त्वं मया अङ्गीकर्तुं युज्यते इत्येवं बहवो शासनाधिकारिणः शुभचिन्तकाश्च विचारयन्तः आसन्। पूर्वविखण्डितः सोवियतसङ्घः अतो विगतमहिम्नो रूसदेशस्य विगतशताब्द्याः अन्तिमे दशके अहरहः पतनोन्मुखिनी अर्थव्यवस्था च तान् तथा विचारयितुं प्रेरितवती। इतोऽपि विचारणीयतरमिदमासीत् यत् अस्याः प्राग्वर्तिनीनामन्यासां कासांचित् योजनानामनुभवाः अपि नोत्साहं वर्धयन्ति स्म, विशेषस्तासां यत्रोच्चतरा च काचित् प्रौद्योगिकी अपेक्ष्यमाणा आसीत् यतस्ताद्दश्यस्ताः उत्पादकोटिमानेतुं बहूनि सङ्कटानि शङ्क्यन्ते। पुनरपि राष्ट्रस्य पूर्ववर्तिभ्यः महद्भ्यो युगद्रष्टृभ्यो वैज्ञानिकभ्यो यन्मया शिक्षितं तन्नूनमेव मे साहाय्याय कल्पिष्यत इति अनया भावनया तुष्यन्नेवायं जनः आसीत्। डॉ. विक्रमसाराभाई- डॉ. सतीशधवन- डॉ. ए.पी.जे.

अब्दुलकलामाः एव तेषु यशस्विषु वैज्ञानिकेषु मूर्धन्यतमाः अवर्तन्त यैः प्रौद्योगिकीदृशा विकसितस्य भारतराष्ट्रस्य आधारभूः संस्थापिताः। तेषां साहाय्येनाहं मार्गेऽग्ने आशङ्क्यमानानि आह्वानानि सम्मुखीकर्तुं दृढं निश्चिनोमि स्म।

तैः युगद्रष्टृभिः नेतृत्वकर्तृभिरेका एतादृशी कार्यसंस्कृतिविकसिता यस्याः साहाय्येन इष्टसाफल्यप्राप्तिः सम्भवा आसीत्। यूनामभियन्तॄणां वैज्ञानिकानाञ्च लघुण्वप्युपलब्धिषु तान् प्रोत्साहयितुं तेषामद्भुत एव कश्चन पन्थाः अवर्तत भवन्तु नाम ते वैज्ञानिकाः कनीयसोऽपि कनीयसि पदे स्थिताः। ते महान्तो जनास्तेषां कनीयसां त्रुटीरपि एतावता म्रदिम्ना व्यज्ञापयन् येन शिक्षणं सरलमजायत। देशयोर्द्वयोः श्रेष्ठवैज्ञानिकमतीनामेकत्रीभूय मैत्र्या विश्वासेन च कर्मकरणद्वारा 'ब्रह्मॉस' इत्येतद् एकस्याः अभूतपूर्वायाः सफलतायाः कामपि गाथां निबद्धं शक्नोतीति द्रढीयान् विश्वासोऽवर्तत।

मया ब्रह्मॉसनिर्माणाय संयुक्तपरियोजनायाः अस्याः मुख्यकार्यकार्यधिकारित्वेन प्रबन्धनिदेशकत्वेन च कार्यभारो गृहीतः। अत्रायमभिप्रायो निहितः एवासीद् यन्मया द्विगुणमेवोत्तरदायित्वं निर्वहणीयमासीत्। रक्षानुसन्धानविकाससंस्थानस्य प्रक्षेप्यास्त्रपरियोजनानां मुख्यनियन्त्रकत्वं ब्रह्मॉसयोजनायाः मुख्यकार्यकार्यधिकारिप्रबन्धनिदेशकत्वञ्चेति इमे ते निर्वहणीये अवर्तेतां यथोभयोरनयोः हितानि परस्परं न संघट्टितानि भवेयुः। अद्यापि यदा ते दिवसाः मत्स्मृतिपटलमवतरन्ति तदाऽहमुद्गतरोमाञ्चः भवामि। परं व्यस्तदिनानां तेषां फलीभूताः स्मृती: निजमानसे सम्यक् संरक्षयितुमिहे।

अद्य विश्वस्मिन्विश्वे भारतरसियादेशयोर्मध्ये संस्थापितेयं संयुक्तपरियोजना अन्ताराष्ट्रियसैन्यसुरक्षासहयोगस्य श्रेष्ठोदाहरणरूपेण स्वीक्रियते प्रशस्यते च। विभिन्नानां प्रक्षेप्यास्त्रप्रौद्योगिकीनां कौशलानामेवंविधेन परस्परं विनिमयेन प्रक्षेप्यास्त्रमिदं स्वीयवर्गे विशिष्टतमस्त्रमभवत्। अस्याभिकल्पनात उत्पादपर्यन्तं वैज्ञानिकाः सततं साहाय्येन कार्यमकुर्वन्। अस्याभिकल्पनाविकासोत्पादनविपणनानि यावत् सर्वचरणेषु अनेन येऽनुभवाः अस्माभिर्राशीकृताः प्राप्ताः वा तेऽद्भुता: विस्मयकारिणश्च सन्ति। अद्य विश्वे नैक देशाः भारतात् ब्रह्मॉसप्रक्षेप्यास्त्रक्रयमभिकाङ्क्षन्ति येन ते स्वीयसैन्यदलानि शक्तिमत्तराणि कुर्युः। अनेनोत्कटेन शक्तिमता प्रक्षेप्यास्त्रेण यैः स्वसैन्यबलं संवर्द्धितं तेभ्योऽन्ये देशाः विभ्यति। ब्रह्मॉसपराध्वनिकक्रूजप्रक्षेप्यास्त्रम्

उत्कृष्टप्रविधिसाफल्यनिदर्शनं वर्तते यस्य समग्रं श्रेयः परियोजनायाः अस्याः संयुक्ताय नवाचारिस्वरूपाय च दीयते।

वयं ह्यमवलोकयामश्चेत् पूर्वं भारते गणितक्षेत्रे, विज्ञाने, अभियान्त्रिक्यां, प्रौद्योगिक्यां, चिकित्सायाम्, ओषधौ, संगीतविज्ञाने, ब्राह्मणविज्ञाने च अत्यन्ता उन्नता दशा आसीत्। बहुविधा: महत्त्वपूर्णा आविष्कारा अपि सञ्जाता परं दौर्भाग्यमेव तेषां समीचीनरीत्या किमपि लिखितं विवरणं न प्राप्यते। कदाचिदस्यायं हेतुः यत् कश्चिद् तमनुकृत्य तस्याविष्कारस्य दुरुपयोगं न कुर्यात्। अतीते काले आभियान्त्रिकीक्षेत्रे प्राप्तानां बहूनामीदृशानामुपलब्धीनां विवरणानि प्राप्यन्ते यानि ऐदंयुगीनेभ्य आविष्कारेभ्यः न्यूनतराणि कथमपि न सन्ति। तमिलनाडुप्रदेशे तिरुचिरापल्लीजनपदे स्थितो जलावरोधः अस्यापूर्वमुदाहरणम्। अयं जलावरोधः २००० वर्षाणि पूर्वं करिकालचोलराज्ञां काले निर्मितः। नभोमार्गात् प्रेक्षणेऽस्यस्वरूपं प्रस्तरैः अश्मचूर्णैः निर्मितस्य सर्पस्य वक्रगत्याकृतेः लक्ष्म इव दृश्यते। १८शताब्द्यां आङ्गलशासने यदास्य पुनर्निर्माणं जातं ततः सहस्राधिकवर्षात्पूर्वं तस्मिन् जलभण्डारणमक्रियत। अद्य कर्णाटके तमिलप्रदेशे च कावेरीनद्यां तस्याः सहावर्तीनीनां नदीनामुपरि निर्मितेन जलावरोधेन तत्र जलप्रवाहो न्यूनोऽभवत्। परं विगतकाले एभिर्विना जलप्रवाहः विनाशकरोऽभविष्यत्। अद्यापि विषयस्यास्य दक्षा अभियन्तारः एतस्य ज्ञानेऽसमर्थाः यत् तस्मिन्काले जलानां भीषणप्रवाहं विशालजलराशिं च नियन्त्रितुम् अन्यदिशि वा कर्तुं तत्कालीना अभियन्तारः कथं सफला अभविष्यन्। नूनमेवास्मिन् कर्मणि अपूर्वः कोऽपि मानवप्रयासः पशुबलसाहाय्यं च सहायकः अभवताम्। परमस्माकं पार्श्वे तस्य किञ्चिदपि विवरणं नास्ति यत् उपनिषद् अभियन्त्रणस्य इयदुत्कृष्टा उपलब्धि तत्कालीनैः जनैः कथं लब्धा। इत्थमेव देहल्यां कुतुबमीनारं निकषा स्थितः लौहस्तम्भः यश्च यवनेभ्यः पूर्वं ९१२ ई.पू. स्थापितः। अद्यावधि लौहविकारं विना अलाविधिः धातुविज्ञानक्षेत्रे कश्चन चमत्कार एव। अद्यापि किमपि लिखितं वृत्तं नो प्राप्यते येनेतद् ज्ञायेत यत् लौहस्तम्भे धातूनां मिश्रणस्य कोऽनुपातो येनेयता सुदीर्घकालेनापि लौहविकार: (जंग) नास्ति।

प्राचीने भारतवर्षे चिकित्सायां भेषजविज्ञानक्षेत्रे चापि अभूतपूर्वा प्रगतिश्चाजायत। एवं हि श्रूयते यत्तदानीमाचार्यः सुश्रुत ऐदंयुगस्य इव सुरूपचिकित्साम् अकरोत्। चिकित्सायां सिद्धपद्धत्यां दक्षाः विद्वांसः पारदरूखिसासदृशविषाक्तपदार्थानां

कुशलोपयोगेन कर्करोगसदृशानां भयङ्कराणां घातुकानाञ्च रोगानां चिकित्सामकुर्वन्। त एष विषयुतानां तत्वानामुपयोगमतिसूक्ष्मतमपरिमाणे चक्रुः येनेतद् ज्ञायते यत् सूक्ष्मतमा प्रोद्योगिकी भारताय नूतना नास्ति। एषामोषधीनां निर्माणाय एभ्यः विषयुतेभ्यः पदार्थेभ्यः निर्गतः दूषितो वायुः श्वासैः सह फुस्फुसेषु प्रविश्य प्राणघातकः भवितुं शक्नोति स्म। एभ्यः क्लेशेभ्यः आत्मानं रक्षितुं ते सिद्धाः चिकित्सकाः स्वीययोगकौशलमुपयुञ्जते स्म तदोषधीनां च निर्माणकाले अल्पकालाय निजप्राणान् अवरुन्धति स्म।

तैः त्यक्तेषु स्वल्पविवरणेषु ये रसायनयोगाः चर्चिताः तेऽद्य उन्नततरयुगेऽपि प्राप्तुमसम्भवाः। तेषामुल्लेखैरिदं ज्ञायते यत् तैः केचन असाध्यरोगाः अपि चिकित्सिताः परमेतत्सम्बद्धानि विवरणानि नोपलभ्यन्ते साम्प्रतम्। ईदृशस्य चिकित्सकीयस्य चमत्कारस्य साक्षी अहमपि वर्ते। निजायुषः दशमे वर्षे बालेन मया श्रीमन्तः आपत्तुकान्तपिल्लैवर्याः (परेषां त्राता), सिद्धचिकित्सापद्धतौ आयुर्वेदे योगे च दक्षाः मत्पितरः कर्कटव्याधिसदृशधातुकान् रोगान् उपचरन्तः दृष्टाः। परन्तु निजान्यसहयोगिनामिव तैरपि किमपि लिखितं विवरणं न त्यक्तम्।

प्रौद्योगिक्याः क्षेत्रे बहवः चमत्कारिण्य उपलब्धयः उल्लिखिताः प्राप्यन्ते परं पर्याप्तं विवरणं सर्वत्र अप्राप्यं वर्तते। अतीते भारतवर्षः स्वीयज्ञानस्य विस्तृतभण्डारेण समग्रविश्वे शिरोमणित्वमभजत। परं विगतसहस्रवर्षेभ्यः वैदेशिकानामाक्रान्तानामाक्रमणेन दासत्वस्य अन्धयुगे निमग्नः। अद्य वयं तस्याः दासत्वतमसोः बहिर्भूत्वा दूरमागताः। अस्माकं नैकेषां महतां नेतृणां यान्येषां भारतीयानां बलिदानेनेयं स्वतन्त्रतास्माभिरधिगता। परं राजधान्यामीदृशः कश्चित्स्मारकः नास्ति यस्तेषां महतां हुतात्मनां सम्मानस्य स्वतन्त्रतायाः महिम्नश्च प्रतीको भवेत्। सम्प्रति समृद्धमुन्नतिशीलञ्च भारतं प्रेक्ष्यास्माकीनो युववर्गः अत्यन्तमुत्सहते। परं तेऽस्माकं स्वतन्त्रतान्दोलनस्य क्लेशान् संघर्षान् देशस्यातीतं महत्त्वं च न विदन्ति। अतोऽस्माभिः स्वीयानामुपलब्धीनां कार्याणाञ्चैकं विस्तृतं विवरणं करणीयं येन राष्ट्रस्य युववर्गे राष्ट्रभक्तेः भावना उत्पद्येत।

वर्तमाने ब्रह्मॉसनिर्माणं काचिदसाधारणा उपलब्धिः। ब्रह्मॉसनिर्माणस्येदं कर्म शून्यादारब्धम् एकस्मात् जलयानरोधिप्रक्षेपास्त्रनिर्माणयोजनातः आरभ्य अस्माभिरिदमेकं सार्वभौमिकस्वरूपस्य प्रक्षेपास्त्रं निर्मितम्। अद्येदं बहुस्थानिक

बहुलक्ष्यकं बहुभूमिकायुक्तं बहुप्रक्षेपपथीयं प्रक्षेपास्त्रं वर्तते॥ एकदशकतोऽपि न्यूनकाले प्रक्षेपास्त्रमिदं स्वीयरूपाकारसंकल्पनातो सेनायामग्रपंक्तौ नियुक्तिस्थानं प्राप्नोत् श्लाघनीयम्। स्वीयेन वैशिष्ट्येन शक्त्या च ब्रह्मॉसप्रक्षेपास्त्रं विश्वेतिहासपृष्ठे अङ्कितमभवत्।

यदा अहं साफल्योत्सवं मानयन् युद्धपोते अरबार्णवे जले तरन् पश्चिमतरं भारतं यामि स्मः स्वीयदेशस्य ब्रह्मॉसप्रक्षेपास्त्रस्य च निर्माणस्य अतीतचिन्तने निमज्जामि स्म। तदैव युद्धपोतनायकः पोतस्य तटसमीपप्राप्ति मसूचयत्। पोतादवतीर्णोऽहं यावत्समीपे नौसेनापत्तनं प्राप्नोमि तावत् ब्रह्मॉसनिर्माणस्य स्वीयाननुभवान् पुस्तकरूपेण लिपिबद्धान् कर्तुं विचारो मे मनस्यतिष्ठत्। विवरणमिदं न सम्यक्नोपबद्धं चेदस्माकं प्रयासः प्रौद्योगिकी चोभौ भविष्ये विस्मृतिं गमिष्यतः लोके भविष्ये युवभिश्च पुनरयं प्रविधिः आविष्करणीयः भवेत्। अद्याहं ब्रह्मॉसविषये लिखितपुस्तकेन सह भवतां समक्षमस्मि तदिदं प्रक्षेपास्त्रं यस्य तुल्यमपरं प्रक्षेपास्त्रं साम्प्रतं आविष्कारमिच्छति।

अस्माकं पन्थाः कुत्रापि सुगमः नैवासीत्। अनुपयुक्तपूर्वाः काश्चनास्माकं कार्यप्रणाल्यः सर्वथा नवीनाः आसन्। आशासे यदिदं पुस्तकमास्माकीनानां भाविनां युगन्धरीणानां कृते अत्यन्तमुपयोगि भविष्यति तेषां पथि आगामिनीनां विघ्नानामपाकरणाय बाधासु च साहसप्रदानाय प्रेरणास्वरूपं भविष्यति।

अनया परिघटनया सम्बद्धं पुस्तकं "ब्रह्मॉस प्रक्षेपास्त्र की सफलता" लेखनस्य उद्देश्यमिदं यदिदं बहुषु जनसमवायेषु प्रचरेदतः मया प्रौद्योगिक्याः सूक्ष्माः जटिलताः नात्र चर्चिताः। इतो प्रक्षेपास्त्रस्यास्य रूपाकारसम्बन्धिनः महत्वपूर्णपक्षाः प्रदर्शनसम्बन्धिनश्च केचन पक्षाः अचर्चिताः ब्रह्मॉसप्रक्षेपास्त्रस्य भारते महत्त्वपूर्णस्थितिः तेषामचर्चायाः हेतुः।

अहं स्वीयाननुभवान् संभाजयितुम् एकस्याः सामुद्रिकयात्रायाः रूपकस्य प्रयोगमकुर्वम्। तस्यायं हेतुः यदस्य पुस्तकस्य आद्या अस्पष्टरूपरेखा मे मनसि सामुद्रिकयात्रावसर एवातिष्ठत्।

(पुस्तकस्यास्यार्यभाषानुवादं श्रीमतिमञ्जलिकालक्ष्मी अकरोत् यस्य लोकार्पणं विज्ञानपरिषद्प्रयागस्य डॉ. ए.पी.जे. अब्दुलकलाम सभागारे अक्रियत। पुस्तकस्य लोकार्पणवेलायां महान्तः भारतीयाः वैज्ञानिकाः डॉ ए. शिवताणुपिल्ले महाभागाः स्वयमुपस्थिताः आसन्। वेलेयं परिषत्कृतेऽपि अविस्मरणीया आसीत्।)



गुरुकुल प्रभात आश्रम, (टीकरी) भोलाझाल, मेरठ